औकारावसाना वर्णाः स्वरसंज्ञाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥४॥

**एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः ।१।१।५॥**

मात्रा कालविशेषः । एक-द्वि-त्र्युच्चारणमात्रा औदन्ता वर्णा यथासंख्यं ह्रस्व-दीर्घ-प्लुतसंज्ञाः स्युः । अ इ उ ऋ ऌ, आ ई ऊ ॠ ॡ, ए ऐ ओ औ, आ३ ई३ ऊ३ इत्यादि ॥५॥

**अनवर्णा नामी ।१।१।६॥**

अवर्णवर्जा औदन्ता वर्णा नामिसंज्ञाः स्युः । इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥६॥

**ऌदन्ताः समानाः ।१।१।७॥**

ॡकारावसाना वर्णाः समानाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ॥७॥

**ए-ऐ-ओ-औ सन्ध्यक्षरम् ।१।१।८॥**

'ए ऐ ओ औ' इत्येते वर्णाः सन्ध्यक्षराणि स्युः ॥८॥

**अं-अः अनुस्वार-विसर्गौ ।१।१।९॥**

अकाराद्युच्चारणार्थौ, 'अं' इति नासिक्यो वर्णः 'अः' इति च कण्ठ्यः यथासंख्यम् 'अनुस्वार-विसर्गौ' स्याताम् ॥९॥

**कादिर्व्यञ्जनम् ।१।१।१०॥**

कादिर्वर्णो हपर्यन्तो व्यञ्जनं स्यात् । क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व, श ष स ह ॥१०॥

**अपञ्चमान्तस्थो धुट् ।१।१।११॥**

वर्गपञ्चमा-ऽन्तस्थावर्जः कादिर्वर्णो धुट् स्यात् । क ख ग घ, च छ ज झ, ट ठ ड ढ, त थ द ध, प फ ब भ, श ष स ह ॥११॥

**पञ्चको वर्गः ।१।१।१२॥**

कादिषु वर्णेषु यो यः पञ्चसंख्यापरिमाणो वर्गः स स वर्गः स्यात् । क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ म ॥१२॥

## आद्य-द्वितीय-श-ष-सा अघोषाः ।१।१।१३॥

वर्गाणामाद्य-द्वितीया वर्णाः श-ष-साश्च अघोषाः स्युः। क ख, च छ, ट ठ, त थ, प फ, श ष स ॥१३॥

## अन्यो घोषवान् ।१।१।१४॥

अघोषेभ्योऽन्यः कादिर्वर्णो घोषवान् स्यात्। ग घ ङ, ज झ ञ, ड ढ ण, द ध न, ब भ म, य र ल व, ह ॥१४॥

## य-र-ल-वा अन्तस्थाः ।१।१।१५॥

एते 'अन्तस्थाः' स्युः ॥१५॥

## अं-अः-ᳵक-ᳶप-श-ष-साः शिट् ।१।१।१६॥

अ-क-पा उच्चारणार्थाः, अनुस्वार-विसर्गौ वज्र-गजकुम्भाऽऽकृती च वर्णौ श-ष-साश्च शिटः स्युः ॥१६॥

## तुल्यस्थाना-ऽऽस्यप्रयत्नः स्वः ।१।१।१७॥

स्थानं[1] कण्ठादि। आस्ये प्रयत्न आस्यप्रयत्नः स्पृष्टतादिः। तुल्यौ वर्णान्तरेण सदृशौ स्थाना-ऽऽस्यप्रयत्नौ यस्य स वर्णस्तं प्रति स्वः स्यात्।

तत्र त्रयोऽकारा उदात्ता-ऽनुदात्त-स्वरिताः प्रत्येकं सानुनासिक-निरनुनासिक-भेदात् षट्, एवं दीर्घ-प्लुतौ इति अष्टादश भेदा अवर्णस्य, ते सर्वे कण्ठस्थाना विवृतकरणाः परस्परं स्वाः। एवम् इवर्णास्तालव्या विवृतकरणाः स्वाः। उवर्णा ओष्ठ्या विवृतकरणाः स्वाः। ऋवर्णा मूर्द्धन्या विवृतकरणाः स्वाः। लृवर्णा दन्त्या विवृतकरणाः स्वाः। सन्ध्यक्षराणां ह्रस्वा न सन्ति, इति तानि प्रत्येकं द्वादशभेदानि। तत्र एकारास्तालव्या विवृततराः स्वाः। ऐकारास्तालव्या अतिविवृततराः स्वाः। ओकारा ओष्ठ्या विवृततराः स्वाः। औकारा ओष्ठ्या अतिविवृततराः स्वाः। वर्ग्याः पञ्च पञ्च परस्परं स्वाः। य-ल-वानामनुनासिकोऽननुनासिकश्च द्वौ भेदौ परस्परं स्वौ ॥१७॥

---

१. "स्थानं कण्ठादि। यदाहुः — "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च॥" [पाणिनीयशिक्षा, श्लो० ४] इति बृहद्वृत्तौ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org